श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्री-वेगासेतुस्तोत्रम् ॥

*This document* has been prepared by*

**Sunder Kidambi**

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

# ॥ श्री-वेगासेतुस्तोत्रम् ॥

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

एकं वेगवती मध्ये हस्तिशैले च दृश्यते।
उपाय फल भावेन स्वयं व्यक्तं परं महः॥ १ ॥

ईष्टे गमयितुं पारमेष सेतुरभङ्गुरः।
यत्र सारस्वतं स्रोतो विश्राम्यति विशृङ्खलम्॥ २ ॥

जयति जगदेकसेतुः वेगवती मध्य लक्षितो देवः।
प्रशमयति यः प्रजानां प्रथितान् संसार जलधि कल्लोलान्॥ ३ ॥

विभातु मे चेतसि विष्णु सेतुः वेगापगा वेग विघात हेतुः।
अम्भोजयोनेर्यदुपज्ञ मासीत् अभङ्ग रक्षा हयमेध दीक्षा॥ ४ ॥

चतुरानन सप्ततन्तु गोप्ता सरितं वेगवतीमसौ निरुन्धन्।
परिपुष्यति मङ्गळानि पुंसां भगवान् भक्तिमतां यथोक्तकारी॥ ५ ॥

श्रीमान् पितामहवधू परिचर्यमाणः
शेते भुजङ्ग शयने स महा भुजङ्गः।
प्रत्यादिशन्ति भव सञ्चरणं प्रजानां
भक्तानुगन्तुरिह यस्य गतागतानि॥ ६ ॥

प्रशमित हयमेध व्यापदं पद्मयोनेः
श्रितजन परतन्त्रं शेषभोगे शयानम्।
शरणमुपगताः स्मः शान्त निःशेष दोषं
शतमख मणि सेतुं शाश्वतं वेगवत्याः॥ ७ ॥

शरणमुपगतानां सोऽयमादेश कारी
शमयति परितापं संमुखः सर्व जन्तोः।

शतगुण परिणामः सन्निधौ यस्य नित्यं
वर वितरण भूमा वारणाद्रीश्वरस्य॥ ८ ॥

काञ्चीभाग्यं कमल निलया चेतसोऽभीष्ट सिद्धिः
कल्याणानां निधिरविकलः कोऽपि कारुण्य राशिः।
पुण्यानां नः परिणतिरसौ भूषयन् भोगिशय्यां
वेगासेतुर्जयति विपुलो विश्व रक्षैकहेतुः॥ ९ ॥

वेगासेतोरिदं स्तोत्रं वेङ्कटेशेन निर्मितम्।
ये पठन्ति जनास्तेषां यथोक्तं कुरुते हरिः॥ १० ॥

॥ इति श्री-वेगासेतुस्तोत्रम् समाप्तम् ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥